## ओत्। (१५/१०३)

निपातः इति वर्तते । तस्यौकारेण तदन्तविधिः । [1]ओदन्तो यो निपातः स प्रगृह्यसञ्ज्ञो भवति । आहो[2] इति । उताहो इति (म.भा. १.७१) ॥

## सम्बुद्धौ शाकल्यस्येतावनार्षे । (१६/१०५)

ओत् इति वर्तते । सम्बुद्धिनिमित्तो य ओकारः स शाकल्यस्य [3]आचार्यस्य मतेन प्रगृह्यसञ्ज्ञो भवति, इतिशब्दे [4]अनार्षे अवैदिके परतः ।[5] वायो इति, वायविति । भानो इति, भानविति । सम्बुद्धौ इति किम् ? गवित्ययमाह । अत्रानुकार्यानुकरणयोः भेदस्याविवक्षितत्वात्, असत्यर्थवत्त्वे [6]विभक्तिर्न भवति । [7]शाकल्यग्रहणं विभाषार्थम् । इतौ इति किम्? वायोऽत्र[8] । अनार्षे इति किम् ? 'एता गा[9] ब्रह्मबन्ध इत्यब्रवीत्' (का.सं. १०.६) ॥

## उञः । (१७/१०६)

शाकल्यस्येतौ अनार्षे इति वर्तते । उञः प्रगृह्यसञ्ज्ञा भवति इतौ[10] शाकल्यस्याचार्यस्य मतेन । शाकल्यस्य[11] इति विभाषार्थम् । उ इति, विति ॥

## ऊँ । (१८/१०७)

[12]उञः इति वर्तते । उञः [13]इतावनार्षे [14]ऊँ इत्ययमादेशो भवति [15]दीर्घोऽनुनासिकश्च, [16]शाकल्यस्य मतेन [17]प्रगृह्यसञ्ज्ञकश्च । [18]शाकल्यस्य ग्रहणं विभाषार्थमिहाप्यनुवर्तते । तेन त्रीणि रूपाणि भवन्ति--उ इति, [19]विति, ऊँ इति ॥

## ईदूतौ च सप्तम्यर्थे । (१९/१०९)

शाकल्यस्येतावनार्षे इति निवृत्तम् । ईदन्तमूदन्तं च [20]शब्दरूपं सप्तम्यर्थे वर्तमानं[21] प्रगृह्यसञ्ज्ञं [22]भवति । 'अध्यस्यां मामकी तनू' (पै. १.६.८) । मामक्यां तन्वाम् इति प्राप्ते, मामक्याम् मामकी इति, तन्वाम् तनू इति । 'सोमो गौरी अधि श्रितः' (ऋ. ९.१२.३) । ईदूतौ इति किम् ? 'प्रियः सूर्ये प्रियो अग्ना [23]भवाति' (ऋ. ५.३७.५) । अग्निशब्दात् परस्याः सप्तम्याः [24]डादेशः । सप्तमीग्रहणं किम् ? धीती, मती, सुष्टुती--[25]धीत्या, मत्या, सुष्टुत्या [26]इति प्राप्ते । अर्थग्रहणं किम् ? [27]वाप्यश्वः । नद्यातिः । [28]तपरकरणमसन्देहार्थम् ।

---

1. ओदन्तो निपातः प्रगृह्यसञ्ज्ञः ड. 2. अहो इति ब.ड.ई. 3. आचार्यस्य नास्ति अ. 4. अनार्षे नास्ति क.ड.फ. 5. ऋषिः वेदः इत्यधिकम् ग. 6. उत्पत्तिः न भविष्यति ग.ह, विभक्तिर्न उत्पद्यते क, प्रातिपदिकाभावाद् विभक्तिर्नोपपद्यते ड. 7. शाकल्यग्रहणे ब. 8. पटोऽत्र इत्यधिकम् क.ग.ह. 9. गावः ग. 10. अवैदिके इत्यधिकम् ग, अनार्षे परतः इत्यधिकं फ.ह. 11. शाकल्यग्रहणं फ, वाक्यमिदं नास्ति ह. 12. वाक्यमिदं नास्ति फ. 13. स्थाने इत्यधिकम् फ.ह. 14. परतः इत्यधिकम् ग.फ.ह. 15. उञः इत्यधिकम् ब. 16. शाकल्यस्य मतेन नास्ति क. 17. प्रगृह्यसञ्ज्ञश्च ड. 18. शाकल्यग्रहणं क.ड.फ. 19. विति नास्ति फ. 20. यत् शब्दरूपं ड, नास्ति फ.ह. 21. तत् इत्यधिकम् ड. 22. भवति नास्ति फ.ह.ई. 23. भवन्ति फ.ई. 24. लुडादेशः ग. 25. इति इत्यधिकम् क. 26. इति प्राप्ते नास्ति ब.क.ड. 27. वापश्वः ब. 28. तपाकरणं ब.